।।चतुर्थः कैवल्य-पादः ।।

जन्म-औषधि-मन्त्र-तपः समाधिजाः सिद्धयः ॥१॥

देह-अन्तरिता जन्मना सिद्धिः । औषधिभिः – असुर-भवनेषु रसायनेन+इति+एव+आदि । मन्त्रैः -- आकाश-गमन+अणिमादि+लाभः । तपसा – सङ्कल्प-सिद्धिः, कामरूपी यत्र तत्र कामगः+ इति+एवम्+आदि । समाधिजाः सिद्धयः+ व्याख्याताः ॥१॥
तत्र काय-इन्द्रियाणाम्+अन्य-जातीय-परिणतानां—

जातिः+अन्तर-परिणामः प्रकृत्या-आपूरात्॥२॥

पूर्व-परिणाम+आपाय
उत्तर-परिणाम+उपजन:+तेषाम्+अपूर्व-अवयव-अनुप्रवेशात्+भवति।
काय-इन्द्रिय-प्रकृतयः+च स्वं स्वं विकारम्+अनुगृह्णाति+अपूरेण
धर्मादि-निमित्तम्+अपेक्षमाणाः+ इति ॥२॥

निमित्तम्+अप्रयोजकं प्रकृतीनां वरण-भेदः+तु ततः क्षेत्रिकवत्॥३॥

न हि धर्मादि-निमित्तं प्रयोजकं प्रकृतीनां भवति । न कार्येण कारणं प्रवर्त्यते इति । कथम्+तर्हि ? वरणभेदः+तु ततः क्षेत्रिकवत्। यथा क्षेत्रिकः
केदारात्+अपांपूरणात्+केदारान्तरं पिप्लावयिषुः समं निम्नं निम्नतरं वा नापः पाणिना+अपकर्षति+आवरणं तु+आसां भिनत्ति, तस्मिन्+भिन्ने स्वयमेव+आपः केदारान्तरम्+आप्लावयन्ति । तथा धर्मः प्रकृतीनाम्+आवरणम्+अधर्मं भिनत्ति, तस्मिन्+भिन्ने स्वयम्+एव प्रकृतयः स्वं स्वं विकारम्+आप्लावयन्ति ।

यथा वा सः+ एव क्षेत्रिक:+तस्मिन्+एव केदारे न प्रभवति+उदकान्+भौमान् वा रसान्+धान्य-मूलानि+अनुप्रवेशयितुम् । किं+तर्हि ?

**मुद्गग-वेधुक-श्यामाकादीन्+ततः+**अपकर्षति । अपकृष्टेषु तेषु स्वयमेव रसा धान्य-मूलानि+अनुप्रविशन्ति ।

तथा धर्मः+ निवृत्ति-मात्रे कारणम्+अधर्मस्य । शुद्धि+अशुद्ध्योः+अति+अन्त-विरोधात्। न तु प्रकृति-प्रवृत्तौ धर्मः+ हेतुः+भवति+इति । अत्र नन्दीश्वरादय उदाहार्याः । विपर्ययेण+अपि+अधर्मः+ धर्मं बाधते । ततः+च+अशुद्धि-परिणामः+ इति । तत्र+अपि नहुष-अजगरादयः+ उदाहार्याः ॥३॥

तदा तु योगी **बहून्+कायान्+निर्मिमीते** तदा किम्+एक-मनस्काः+ते **भवन्ति+अथ-अनेक-मनस्काः+** इति ?

निर्माण-चित्तानि+अस्मिता-मात्रात्॥४॥

अस्मिता-मात्रं चित्तकारणम्+उपादाय निर्माण-चित्तानि करोति, ततः सचित्तानि भवन्ति ॥४॥

प्रवृत्ति-भेदे प्रयोजकं चित्तम्+एकम्+अनेकेषाम् ॥५॥

बहूनां चित्तानां कथम्+एक-चित्त-अभिप्रायपुरःसरा प्रवृत्तिः+इति।  सर्व-चित्तानां प्रयोजकं चित्तम्+एकं निर्मिमीते, ततः प्रवृत्तिभेदः ॥५॥

तत्र ध्यानजम्+अनाशयम् ॥६॥

पञ्च-विधं निर्माण-चित्तं जन्म+औषधि+मन्त्र+तपःसमाधिजाः सिद्धयः+ इति । तत्र यत्+एव ध्यानजं चित्तं तदेव+आनाशयम्। तस्य+एव न+अस्ति+अशयः+ रागादि-प्रवृत्तिर्नातः पुण्य-पापाभि-सम्बन्धः , क्षीण-क्लेशत्वात्+योगिनः+ इति । इतरेषां तु विद्यते कर्माशयः ॥६॥

यतः—

कर्मा-शुक्ला-कृष्णं योगिनः+त्रिविधम्+इतरेषाम् ॥७॥

चतुष्-पात्+खलु+इयं कर्म-जातिः— कृष्णाः, शुक्ल-कृष्णा, शुक्ला,अशुक्ला-कृष्णा च+इति। तत्र कृष्णा दुरात्मनाम् । शुक्ल-कृष्णा बहिः - साधन-साध्या, तत्र पर-पीड-अनुग्रह-द्वारेण-एव कर्माशय-प्रचयः । शुक्ला तपः-स्वाध्याय-ध्यानवताम् । सा हि केवले मनस्यायत्+तत्वात्+बहिः साधन-अधीना न परान्-पीडयित्वा भवति । अशुक्ल-अकृष्णा संन्यासिनां क्षीण-क्लेशानां चरम-देहानाम्+इति । तत्र-अशुक्लं योगिनः+ एव फल-संन्यासात्+अकृष्णं च+अनुपादानात्। इतरेषां+तु भूतानां पूर्वम्+एव त्रिविधम्+इति ॥७॥

ततः+तद्+विपाक-अनुगुणानाम्+एव+अभिव्यक्तिः+वासनानाम् ॥८॥

ततः+ इति त्रिविधात्+कर्मणः । तद्+विपाक-अनुगुणानाम्+एव+इति । यत्+जातीयस्य कर्मणः+ यो विपाकः+तस्य+अनुगुणा या वासनाः कर्म-विपाकम्+अनुशेरते, तासाम्+एव+अभिव्यक्तिः। न हि दैवं कर्म विपच्यमानं नारक+तिर्यङ्+मनुष्य-वासनाभिः व्यक्ति-निमित्तं भवति । किन्तु दैव-अनुगुणा एव+अस्य वासना व्यज्यते । नारक-तिर्यक्+मनुष्येषु च+एवं समानः+चर्चः ॥८॥

जाति-देश-काल-व्यवहितानाम्+अपि+आनन्तर्यं स्मृति-संस्कारयोः+एक-रूपत्वात्॥९॥

वृषदंश-विपाकोदयः स्वव्यञ्जक+अञ्जन+अभिव्यक्तः । सः+ यदि जातिशतेन वा दूरदेशतया वा कल्पशतेन वा व्यवहितः पुनः+च स्वव्यञ्ज-काञ्जन **एवोदियात् द्राक्-इति-एव** पूर्व+अनुभूत-वृषदंश-विपाक-अभिसंस्कृता वासना उपादाय व्यज्येत । कस्मात्? यतः+ व्यवहितानाम्+अपि+यासां सदृशं करं अभिव्यञ्जकं निमित्तीभूतम्+इति+आनन्तर्यम्+एव । कुतः+च ? स्मृति-संस्कारयोः+एकरूपत्वात्। यथा+अनुभवा+तथा संस्काराः । ते च कर्म-वासना+अनुरूपाः । यथा च वासना+तथा+ स्मृति+इति जाति-देश-काल अव्यवहितेभ्यः संस्कारेभ्यः स्मृतिः । स्मृतेः+च पुनः संस्काराः+ इति+एवम्+एते स्मृति-संस्काराः कर्माशय-वृत्ति-लाभ-वशाद्+अव्यज्यन्ते।

अतः+च+व्यवहितानाम्+अपि निमित्त-नैमित्तिक-भावान्+अनुच्छेदाद्+आनन्तर्यम्+एव सिद्धम्+इति ॥९॥

तासाम्+अनादित्वं+ च+अशिषः+ नित्यत्वात्॥१०॥

तासां वासनानाम्+अशिषः+ नित्यत्वात्+अनादित्वम् । य+इयम्+आत्माशीर्मा न भूवं भूयासम्+इति सर्वस्य दृश्यते, सा न स्वाभाविकी । कस्मात्? जात-मात्रस्य जन्तोः+अननुभूत-मरण-धर्मकस्य द्वेष-दुःखानुस्मृति-निमित्तः+ मरणत्रासः कथं भवेत्? न च स्वाभाविकं वस्तु निमित्तम्+उपादत्ते। तस्मात्+अनादि-वासना+अनुविद्धम्+इदं चित्तं निमित्तवशात्+कश्चित्+एव वासनाः प्रतिलभ्य पुरुषस्य भोगाय+उपावर्ततः+ इति । घट-प्रासाद-प्रदीप-कल्पं सङ्कोच-विकासि चित्तं शरीर-परिमाण-आकारमात्रम्+इति+अपरे प्रतिपन्नाः । तथा च+अन्तराभावः संसारः+च युक्तः+ इति । 'वृत्तिः+एव+अस्य **विभुनः+चित्तस्य** सङ्कोच-विकासिनी'+इति+आचार्यः। तत्+च धर्मादि+निमित्त+अपेक्षम् । निमित्तं च द्विविधं— बाह्यम्+आध्यात्मिकं च । शरीरादि-साधनापेक्षं बाह्यं **स्तुति-दान-अभिवादन-आदि** , चित्तमात्राधीनं श्रद्धादि+आध्यात्मिकम् । तथा च+ उक्तं— "ये च+एते मैत्र्यादयः+ ध्यायिनां विहाराः+ते बाह्य-साधननिरनुग्रहात्मनः प्रकृष्टं धर्मम्+ अभिनिवर्तयन्ति" । तयोः+मानसं बलीयः । कथं ? ज्ञान-वैराग्ये केन+अतिशय्येते ? दण्डक-अरण्यं च चित्त-बल-व्यतिरेकेण कः शरीरेण कर्मणा शून्यं कर्तुम्+उत्सहेत, समुद्रम्+अगस्त्यवत्+वा पिबेत्॥१०॥

हेतु-फल-आश्रय+आलम्बनैः संगृहीतत्वात्+एषाम् +अभावे तद्+अभावः॥११॥

हेतुः+धर्मात्+ सुखम्+अधर्माद् +दुःखम् । सुखाद्+रागः दुःखाद्+द्वेषः । ततः+च प्रयत्नः। तेन मनसा वाचा कायेन वा परिस्पन्दमानः परम+अनुगृह्णाति+उपहन्ति वा । ततः पुनः धर्म-अधर्मः+सुख-दुःखे, राग-द्वेषः+ इति प्रवृत्तम्+इदं षडरं संसार-चक्रम् । अस्य च प्रतिक्षणम्+आवर्तमानस्य+अविद्या नेत्री, मूलं सर्वक्लेशानाम् इति+एषः हेतुः । फलं तु यम्+आश्रित्य यस्य प्रति+उत्पन्ना धर्मादिः, न ही+अपूर्वोपजनः । मनः+तु सा+ अधिकारम्+आश्रयः+ वासनानाम् । न ही+अवसित-अधिकारे मनसि निराश्रया वासनाः

स्थातुम्+उत्सहन्ते । यद्+अभिमुखीभूतं वस्तु यां वासनां व्यनक्ति, तस्याः+तद्+आलम्बनम् । एवं हेतु-फलाश्रया+आलम्बनैः+एतैः सङ्गृहीताः सर्वा वासनाः। एषाम्+अभावे तत्+सम्श्रयाणाम्+अपि वासनानाम्+अभावः ॥११॥

नास्ति+असतः नास्ति+असतः सम्भवः+ न च+अस्ति सतो विनाशः+ इति द्रव्यत्वेन सम्भवत्यः कथं निवर्तिष्यन्ते वासनाः ? इति—

अतीत-अनागतं स्वरूपतः+अस्ति+अध्वभेदाद्+ धर्माणाम्॥१२॥

भविष्यति+अभिव्यक्तिकम्+अनागतम् । अनुभूत-व्यक्तिकम्+अतीतम् । स्व-व्यापारः+ उपारूढं वर्तमानम् । त्रयं च+एतद्+वस्तु ज्ञानस्य ज्ञेयम् । यदि च+एतत्+स्वरूपतः न+अभविष्यत्+न+इदं निर्विषयं ज्ञानम्-उदपत्स्यत । तस्माद्+अतीत+अनागतं स्वरूपतः+अस्ति +इति । किं च, भोग-भागीयस्य वा+अपवर्ग-भागीयस्य वा कर्मणः

फलम्+उत्पित्सु यदि निरुप-आख्यम्+इति तद्+उद्देशेन तेन निमित्तेन कुशल-अनुष्ठानं न युज्येत । सतश्च फलस्य निमित्तं वर्तमानीकरणे समर्थं, न+अपूर्वोपजनने । सिद्धं निमित्तं नैमित्तिकस्य विशेष+अनुग्रहणं कुरुते, न+अपूर्वम+उत्पादयति ।

धर्मी च+अनेक-धर्मस्वभावः । तस्य च+अध्वभेदेन धर्माः प्रति+अवस्थिताः । न च यथा वर्तमानं व्यक्ति-विशेष+आपन्नं द्रवतः+अस्ति+इति+एवम्+अतीतम्+अनागतं वा । कथं तर्हि ? स्वेन+एव व्यङ्ग्येन स्वरूपेण अनागतम्+अस्ति । स्वेन च+अनुभूत-व्यक्तित्वेन स्वरूपेण+अतीतम्+इति । वर्तमानस्य+एव+अध्वनः स्वरूपव्यक्तिः+ इति, न सा भवति+ अतीत+अनागतयो +अध्वनोः । एकस्य च +अध्वनः समये द्वौ+अवध्वानौ धर्मिसमन्वागतौ भवत एव+इति, न+अभूत्वा भावः+त्रयाणाम्+अध्वनाम्+इति ॥१२॥

ते व्यक्त-सूक्ष्मा गुणात्मानः ॥१३॥

ते खलु+अमी त्र्यध्वानो धर्मा वर्तमाना व्यक्तात्मानः+अतीत-अनागताः सूक्ष्मात्मानः । सर्वम्+इदं गुणानां सन्निवेश-विशेषमात्रम्+इति परमार्थतः+ गुणात्मानः । तथा च शास्त्र+आनुशासनम्—

"गुणानां परमं रूपं न दृष्टि-पथं-ऋच्छति ।
यत्तु दृष्टि-पथं प्राप्तं तन्माय-इव सुतुच्छकम् ॥" इति ॥१३॥

यदा तु सर्वे गुणाः, कथमेकः शब्द एकम् +इन्द्रियम्+इति ?

परिणाम-एकत्वात्+वस्तु-तत्त्वम्॥१४॥

प्रख्या+क्रिया-स्थिति-शीलानां गुणानां ग्रहणात्मकानां करण-भावेन+एकः परिणामः श्रोत्रम्+इन्द्रियम्, ग्राह्यात्मकानां शब्दभावेन+एकः परिणामः शब्दः+ विषयः+ इति । शब्दादीनां मूर्ति-समान-जातीयानाम्+एकः परिणामः पृथिवी-परमाणुः+तन्मात्र-अवयवः। तेषां च+एकः परिणामः पृथिवी गौः+वृक्षः पर्वत इति+एवम्+आदिः+भूतान्तरेषु+अपि स्नेह-औष्ण्य-प्रणामित्व-अवकाशदानानि+उपादाय सामान्यम्+एक-विकार-आरम्भः समाधेयः ।

नास्ति+अर्थो विज्ञान-विसहचरः, अस्ति तु ज्ञानम्+अर्थ-विसहचरः स्वप्नादौ कल्पितम्+इति अनया दिशा ये वस्तु-स्वरूपम्+अपह्नुवते, ज्ञान-परिकल्पना-मात्रं वस्तु स्वप्न-विषयोपमं न परमार्थतः+अस्ति+इति आहुः, ते तथ+एति प्रति+उपस्थितम्+इदं स्वमाहात्म्येन वस्तु कथम्-अमाणात्मकेन विकल्प-ज्ञान-बलेन वस्तु-स्वरूपम्+उत्सृज्य तदेव+आपलपन्तः श्रद्धेय-वचनाः स्युः ? ॥१४॥

कुतः+च +एतद्+न्याय्यं ?

वस्तु-साम्ये चित्त-भेदात्-तयोः+विभक्तः पन्थाः ॥१५॥

बहुचित्त+अवलम्बिनीभूतम्+एकं वस्तु साधारणम् । तत्+खलु न+एक-चित्त-परिकल्पितं न-अपि+अनेक-चित्त-परिकल्पितं, किन्तु स्वप्रतिष्ठितम् । कथं ? वस्तु-साम्ये चित्त-भेदात्। धर्म-अपेक्षं चित्तस्य वस्तु-साम्ये+अपि सुख-ज्ञानं भवति । अधर्म+अपेक्षं ततः+ एव दुःख-ज्ञानं, अविद्या+अपेक्षं ततः+ एव मूढ-ज्ञानं, सम्यग्दर्शन-अपेक्षं ततः+ एव माध्यस्थ्य-ज्ञानम्+इति । कस्य तत्+चित्तेन परिकल्पितं ? न च+अन्य-चित्त-परिकल्पितेन+अर्थेन+अन्यस्य चित्त-उपरागो युक्तः । तस्माद्+ वस्तु-ज्ञानयो:+ग्राह्य-ग्रहण-भेद-भिन्नयो:+विभक्तः पन्थाः । न+अनयोः सङ्कर-गन्धो:+अपि+अस्ति+इति ।

साङ्ख्य-पक्षे पुन:+वस्तु त्रिगुणम् । चलं च गुण-वृत्तम्+इति धर्मादि-निमित्त-अपेक्षं चित्तै:+अभिसम्बध्यते, निमित्त-अनुरूपस्य च प्रत्ययस्य+उत्पद्यमानस्य तेन+आत्मना हेतु:+भवति।

केचिद्+आहुः— **ज्ञानसहभूः+एव+अर्थः** भोग्यत्वात्+सुखादिवद्+इति । त एतया द्वारा साधारणत्वं बाधमानाः पूर्वोत्तरेषु क्षणेषु वस्तु-रूपमेव+अपह्नुवते॥१५॥

न च+एकचित्त-तन्त्रं वस्तु तत्+अप्रमाणकं तदा किं स्यात्॥१६॥

एक-चित्त-तन्त्रं चेत्+वस्तु स्यात्+तदा चित्ते व्यग्रे निरुद्धे वा स्वरूपमेव तेन-अपरामृष्टाम् +अन्यस्य+अविषयी-भूतम्+अप्रमाणकम्+अगृहीत-स्वभावकं केनचित्, तदानीं किं तत्+स्यात्? सम्बध्यमानं च पुन:+चित्तेन कुत:+उत्पद्येत ? ये च+अस्य+अनुपस्थिता भागा:+ते च+अस्य न स्युः, एवं नास्ति पृष्ठम्+इति+उदरमपि न गृह्येत । तस्मात्+स्वतन्त्र:+अर्थः सर्वपुरुष-साधारणः । स्वतन्त्राणि च चित्तानि प्रतिपुरुषं प्रवर्तन्ते । तयोः सम्बन्धाद्+उपलब्धिः पुरुषस्य भोगः+ इति ॥१६॥

तद्+उपराग+अपेक्षत्वात्+ चित्तस्य वस्तु ज्ञात+अज्ञातम् ॥१७॥

अयस्कान्त-मणिकल्पा विषया अयःसधर्मकं चित्तम्+अभिसम्बध्य+उपरञ्जयन्ति । येन च विषयेण+उपरक्तं चित्तं सः+ विषयः+ ज्ञात:+ततो+अन्यः पुन:+अज्ञातः । वस्तुनः+ ज्ञात-अज्ञात-स्वरूपत्वात् अपरिणामि चित्तम् ॥१७॥

यस्य तु तद्+एव चित्तं विषय:+ तस्य—

सदा ज्ञाता:+ चित्तवृत्तय:+ तत्प्रभोः+ पुरुषस्या+ अपरिणामित्वात् ॥१८॥

यदि चित्तवत्+प्रभु:+अपि पुरुषः परिणमेत तत:+तद्विषया:+चित्तवृत्तयः शब्दादि+विषयवत् ज्ञात-अज्ञाताः स्युः । सदा-ज्ञातत्वं तु मनस:+तत्-प्रभोः पुरुषस्य+अपरिणामित्वम्+अनुमापयति ॥१८॥

स्याद+आशङ्का चित्तमेव स्व-आभासं विषय-आभासं च (वैनाशिकानां चित्त-आत्मवादिनां) भविष्यति+अग्निवत्।

न तत्+स्वाभासं+दृश्यत्वात्॥१९॥

यथा+इतराणि+इन्द्रियाणि शब्दादयः+च दृश्यत्वात्+न स्वाभासानि, तथा मन:+अपि प्रत्येतय्वम् । न च+अग्निः+अत्र दृष्टान्तः । न ही+अग्नि:+आत्म-स्वरूपम्+अप्रकाशं प्रकाशयति। प्रकाश:+च+अयं प्रकाश्य-प्रकाशक-संयोगे दृष्टः । न च स्वरूपमात्रे+अस्ति संयोगः । किं+च, स्वाभासं चित्तम् +इति+अग्राह्यम्+एव कस्य+चित्+इति शब्द-अर्थः । तत्+यथा – स्वात्म-प्रतिष्ठम्+आकाशं न परप्रतिष्ठम्+इति+अर्थः । स्व-बुद्धि-प्रचार-प्रति-संवेदनात्+सत्त्वानां प्रवृत्ति:+दृश्यते । क्रुद्ध:+अहं, भीत:+अहं, अमुत्र मे रोग:+अमुत्र मे क्रोधः+ इति । एतत्-स्वबुद्धे:+अग्रहणे न युक्तम्+इति ॥१९॥

एक-समये च+उभय+अनवधारणम् ॥२०॥

न च+एकस्मिन्+क्षणे स्वपररूप-अवधारणं युक्तम् । क्षणिकवादिनः+ यद्-भवनं सः+एव

क्रिया, तद्+एव च कारकम्+इति+अभ्युपगमः ॥२०॥

स्यात्+मतिः— स्वरस-निरुद्धं चित्तं चित्तान्तरेण समनन्तरेण गृह्यत इति ।

चित्तान्तरदृश्ये बुद्धिबुद्धेः+अति-प्रसङ्गः स्मृतिसंकरः+च ॥२१॥

अथ चित्तं चेत्+चित्तान्तरेण गृह्येत, बुद्धि-बुद्धिः केन गृह्यते ? सा+अपि+अन्यया सा अपि +अन्ययेत्+अति-प्रसङ्गः । स्मृति-संकरः+च— यावन्तो बुद्धि-बुद्धीनाम्+अनुभवाः+तावत्यः स्मृतयः प्राप्नुवन्ति । तत्-सङ्कराः च+एक-स्मृत्य-अनवधारणं च स्यात्।

इति+एवं बुद्धि-प्रतिसंवेदिनं पुरुषमपलपद्भिः+वैनाशिकैः सर्वम्+एव+आकुलीकृतम् । ते तु भोक्तृस्वरूपं यत्र क्वचन कल्पयन्तः+ न न्यायेन सङ्गच्छते । केचित्-सत्त्वमात्रम्+अपि परिकल्प्य,अस्ति सः+ सत्त्वः+ यः+ एतान्-पञ्च स्कन्धानि-निक्षिप्य-अन्यांश्च प्रतिसन्दधाति+इत्युक्त्वा, तत एव पुनः+त्रस्यन्ति । तथा स्कन्धानां महानिर्वेदाय विरागाय-अनुत्पादाय प्रशान्तये गुरुः+अन्तिके ब्रह्मचर्यं चरिष्यामि+इत्युक्त्वा सत्त्वस्य पुनः सत्त्वम+एव+अपह्नुवते । साङ्ख्य-योगादयः+तु प्रवादाः, स्वशब्देन पुरुषम्+ एव स्वामिनं चित्तस्य भोक्तारम्+उपयन्ति+इति ॥२१॥

कथं ?--

चितेः+अप्रतिसंक्रमायाः+तदाकार-आपत्तौ स्वबुद्धि-संवेदनम् ॥२२॥

“अपरिणामिनी हि भोक्तृ-शक्तिः+अप्रतिसंक्रमा च परिणामि-अन्यर्थे प्रतिसंक्रान्त+एव तद्-वृत्तिम्-अनुपतन्ति । तस्याः+च प्राप्तचैतन्य+उपग्रहस्वरूपाया बुद्धिवृत्तेः+अनुकार्यमात्रतया बुद्धिवृत्त्य-विशिष्टा हि ज्ञानवृत्तिः+आख्यायते ।” तथा च+उक्तम्—

“न पातालं न च विवरं गिरीणां न+एव+अन्धकारं कुक्षयो न+उदधीनाम् ।
गुहा यस्यां निहितं ब्रह्म शाश्वतं बुद्धिवृत्तिम्-विशिष्टां कवयः+ वेदयन्ते ॥” इति ॥२२॥

अतः+एतद्+उभ्युपगम्यते—

द्रष्टृ-दृश्योः+उपरक्तं चित्तं सर्वार्थम् ॥२३॥

मनो हि मन्तव्येन+अर्थेन+उपरक्तम् । तत्-स्वयं च विषयत्वाद्-विषयिणा पुरुषेण+आत्मीयया वृत्त्याभि-सम्बद्धम् । तद्+एतत्+चित्तमेव द्रष्टृ-दृश्योपरक्तं विषय-विषयि-निर्भासं चेतन+अचेतन-स्वरूपापन्नम्, विषयात्मकम्+अपि +अविषयात्मकम् इव+अचेतनं चेतनम्-इव स्फटिक-मणि-कल्पं सर्वार्थम्+ इति+उच्यते । तद्+अनेन चित्तसारूप्येण भ्रान्ताः केचित्+तदेव चेतनम्+इति+आहुः ।

अपरे चित्तमात्रम्+एव+इदं सर्वं नास्ति खलु+अयं गवादिः+घटादिः+च सकारुणो लोकः+ इति । अनुकम्पनीय+आस्ते । कस्मात्? अस्ति हि तेषां भ्रान्तिबीजं सर्वरूप-अकार-निर्भासं चित्तम्+इति । समाधिप्रज्ञायां प्रज्ञेयः+अर्थः प्रतिबिम्बीभूतः+तस्य+आलम्बनी-भूतत्वाद्+अन्यः । सः+ चेत्+अर्थः+चित्तमात्रं स्यात्+कथं प्रज्ञयैव प्रज्ञारूपम्+अवधार्येत । तस्मात्+प्रतिबिम्बीभूतः+अर्थः प्रज्ञायां येन+अवधार्यते सः+ पुरुषः+ इति । एवं ग्रहीतृ-ग्रहण-ग्राह्य-स्वरूप-चित्त-भेदात्-त्रयम्+अपि+एतत्+जातितः प्रविभजन्ते ते सम्यग्दर्शिनः+तैः+अधिगतः पुरुषः+ इति ॥२३॥

कुतः+च+एतत्?

तद्+असंख्येय-वासनाभिः+चित्तम्+अपि परार्थं संहत्य-कारित्वात्॥२४॥

तद्+एतत्+चित्तम्+संख्येयाभिः+वासनाभिः+एव चित्रीकृतम्+अपि परार्थं परस्य भोग-अपवर्गार्थं, न स्वार्थं संहत्य-कारित्वात्-गृहवत्। संहत्यकारिणा चित्तेन न स्वार्थेन भवितव्यम् । न सुखचित्तं सुखार्थं, न ज्ञानं ज्ञानार्थम्। उभयम+अपि+एतत्+परार्थम् । यः+च भोगेन+अपवर्गेण च+अर्थेन+अर्थवान्-पुरुषः सः+ एव परः। न परः सामान्यमात्रम्। यत्-तु किञ्चित्+परं सामान्यमात्रं स्वरूपेण+उदाहरेद्+वैनाशिकः+तत्+सर्वं संहत्यकारित्वात्+ परार्थम+एव स्यात्। यस्तु+असौ परो विशेषः सः+ न संहत्यकारी पुरुषः+ इति ॥२४॥

विशेष-दर्शिनः+ आत्म-भाव-भावना+विनिवृत्तिः॥२५॥

यदा प्रवृषि तृण-अङ्कुरस्य+उद्भेदेन तद्+बीज-सत्ता+अनुमीयते, तथा मोक्ष-मार्ग-श्रवणेन यस्य रोम-हर्षा-अश्रुपातौ दृश्येते तत्र+अपि+अस्ति विशेष-दर्शन-बीजम् अपवर्ग-भागीयं कर्माभि:+निवृर्तितम्+इति अनुमीयते । तस्य+आत्म-भाव-भावना स्वाभाविकी प्रवर्तते । यस्य+अभावात्+इदम्+उक्तम्— "स्वभावं मुक्त्वा दोषाद्+एषां पूर्वपक्षे रुचि:+भवति+ अरुचि:+च निर्णये भवति।"

तत्र+आत्म-भाव-भावना, "क:+अहम्+आसं, कथम+अहम्+आसं? किं स्विदिदं ? कथं स्विदिदं ? के भविष्यामः ? कथं वा भविष्यामः?" इति । सा तु विशेष-दर्शिनः+ निवर्तते। कुतः ? चित्तस्य+एव+एष: विचित्रः परिणामः । पुरुष:+तु+असत्याम्+अविद्यायां शुद्ध:+चित्तधर्मै:+परामृष्टः+ इति । तत:+अस्य+आत्म-भाव-भावना कुशलस्य निवर्तते इति ॥२५॥

तदा विवेक-निम्नं कैवल्य-प्राग्भारं चित्तम् ॥२६॥

तदानीं यद्+अस्य चित्तं विषय-प्राग्भारम्+अज्ञान-निम्नम्+आसीत् तद्+अस्य+अन्यथा भवति, कैवल्य-प्राग्भारं विवेकज-ज्ञान-निम्नम्+इति ॥२६॥

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥२७॥

प्रत्यय-विवेक-निम्नस्य सत्त्व-पुरुषान्-अन्यता-ख्यातिमात्र-प्रवाहणः+चित्तस्य तच्छिद्रेषु प्रत्ययान्तराणि अस्मि+इति वा मम+एति वा जानामि+इति वा न जानामि+इति वा । कुतः ? क्षीयमाण-बीजेभ्यः पूर्वसंस्कारेभ्यः+इति ॥२७॥

हानम्+एषां क्लेशवत्+उक्तम्॥२८॥

यथा क्लेशा दग्धबीजभावा न प्ररोहसमर्था भवन्ति, तथा ज्ञान-अग्निना दग्ध-बीज-भावः पूर्वसंस्कारः+ न प्रत्ययप्रसू:+भवति । ज्ञान-संस्कारा:+तु चित्त-अधिकार-समाप्तिम्-अनुशेरत इति न चिन्त्यन्ते ॥२८॥

प्रसंख्याने+अपि+अकुसीदस्य सर्वथा विवेकख्याते:+धर्ममेघः समाधिः॥२९॥

यदायं ब्राह्मणः प्रसंख्याने+अपि+अकुसीदः,-- ततः+अपि न किञ्चित्+प्रार्थयते, तत्र+अपि विरक्तस्य सर्वथा विवेक-ख्याति:+एव भवति+इति, संस्कारबीजक्षयात्+न+अस्य प्रत्ययान्तराणु उत्पद्यन्ते। तदा+अस्य धर्ममेघः+ नाम समाधि:+भवति ॥२९॥

ततः क्लेश-कर्म-निवृत्तिः ॥३०॥

तत्+लाभाद्+अविद्यादयः क्लेशाः समूलकाषं कषिता भवन्ति । कुशल+अकुशला:+च कर्माशयाः समूलघातं हता भवन्ति । क्लेश-कर्म-निवृत्तौ जीवन्+एव विद्वान्+विमुक्तः+ भवति । कस्मात्? यस्माद्+विपर्ययः+ भवस्य कारणम् । न हि क्षीण-विपर्ययः कश्चित्+केनचित्+क्वचित्+जातो दृश्यतः+ इति ॥३०॥

तदा सर्व-आवरण-मल-आपेतस्य ज्ञानस्य+आनन्त्यात्+ज्ञेयम्+अल्पम्॥३१॥

सर्वैः क्लेश-कर्म-आवरणै:+विमुक्तस्य ज्ञानस्य+अनन्त्यं भवति । आवरकेण तमसा-अभिभूतम्+आवृतम्-अनन्तं ज्ञानसत्त्वं क्वचिद्+एव रजसा प्रवर्तितम्-उद्घाटितं ग्रहण-समर्थं भवति । तत्र यदा सर्वै:+आवरण-मलै:+अपगत-मलं भवति, तदा भवति+अस्य+अनन्त्यम् । ज्ञानस्य+अनन्त्यात्+ज्ञेयम्+अल्पम् सम्पद्यते, यथा+आकाशे खद्योतः । यत्र+इदम्+उक्तम्—

"अन्धः+ मणिम्-अविध्यत्+तम्+अनङ्गुकिरः+अवयत्।

अग्रीवः+तं प्रत्यमुञ्चत् तम्+अजिह्वः+अभ्यपूजयत्॥" इति ॥३१॥

ततः कृतार्थानां परिणाम-क्रम-परिसमाप्ति:+गुणानाम् ॥३२॥

तस्य धर्ममेघस्य+उदयात्-कृतार्थानां गुणानां परिणामक्रमः परिसमाप्यते । न हि कृत-भोग-अपवर्गाः परिसमाप्त-क्रमाः क्षणमपि+अवस्थातुम्-उत्सहन्ते ॥३२॥
अथ क:+अयं क्रमो नाम+इति ?

क्षण-प्रतियोगी परिणाम-अपरान्त-निर्ग्राह्यः क्रमः ॥३३॥

क्षणान्+अन्तर्यात्मा परिणामस्य+अपरान्तेन+अवसानेन गृह्यते क्रमः। न ही+अननुभूत-क्रम-क्षणा नवस्य पुराणता वस्त्रस्यान्ते भवति। नित्येषु च क्रमः+ दृष्टः। द्वयी च+इयं नित्यता । कूटस्थ-नित्यता परिणामि-नित्यता च । तत्र कूटस्थ-नित्यता पुरुषस्य, परिणामि-नित्यता गुणानाम् । यस्मिन्-परिणम्यमाने तत्त्वं न विहन्यते तत्+नित्यम् । उभयस्य च तत्त्वान्+अभिघातात्+नित्यत्वम् ।

तत्र गुण-धर्मेषु बुद्धि-आदिषु परिणाम-अपरान्त-निर्ग्राह्यः क्रमः+ लब्ध-पर्यवसानः। नित्येषु धर्मिषु गुणेषु+अलब्ध-पर्यवसानः । कूटस्थ-नित्येषु स्वरूपमात्रप्रतिष्ठेषु मुक्त-पुरुषेषु स्वरूप+अस्तिता क्रमेण+एव+अनुभूयत इति तत्र+अपि+अलब्ध-पर्यवसानः, शब्द-पृष्ठेन-अस्ति-क्रियाम्-उपादाय कल्पित इति ।

अथ+अस्य संसारस्य स्थित्या गत्या च गुणेषु वर्तमानस्य+अस्ति क्रम-समाप्ति:+न वेति? अवचनीयम्+एतत्। कथं ? अस्ति प्रश्न एकान्त-वचनीयः सर्वो जातौ मरिष्यति? ओं भो इति ।

अथ सर्वो मृत्वा जनिष्यतः+ इति । विभज्य-वचनीयम्+एतत्। प्रत्युदित-ख्यातिः क्षीण-तृष्णः कुशलः+ न जनिष्यते, इतरः+तु जनिष्यते ।

तथा मनुष्य-जातिः श्रेयसी? न वा श्रेयसी ? इति+एवं परिपृष्टं विभज्य-वचनीयः प्रश्नः, पशून्+उद्दिश्य श्रेयसी देवान्+ऋषीं+च+अधिकृत्य न+इति । अयं तु+अवचनीयः प्रश्नः— संसार:+अयम्+अन्तवान्+अथ-अनन्तः+ इति ? कुशलस्य+अस्ति संसार-क्रम-समाप्ति:+न+इतरस्य+एतत्+अन्यतर-अवधारणे:+अदोषः । तस्मात्+व्याकरणीय एवायं प्रश्नः+ इति ॥३३॥
गुणाधिकार-क्रमसमाप्तौ कैवल्यम्+उक्तम् । तत्+स्वरूपम्+अवधार्यते—

पुरुषार्थ-शून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्ति:+इति ॥३४॥
इति पतञ्जलि-विरचिते योगसूत्रे चतुर्थः कैवल्य-पादः ।

॥ इति पातञ्जल-योग-सूत्राणि ॥

कृतभोग-अपवर्गाणां पुरुषार्थ-शून्यानां यः प्रतिप्रसवः कार्यकारण-आत्मनां गुणानां तत्+कैवल्यम् । स्वरूप-प्रतिष्ठा पुनः+बुद्धिसत्त्वान्+अभिसम्बन्धात्-पुरुषस्य चितिशक्तिः+एव केवला, तस्याः सदा तथा+एव+अवस्थानं कैवल्यम्+इति ॥३४॥

इति श्रीपातञ्जले साङ्ख्य-प्रवचने योग-शास्त्रे श्रीमद्व्यास-भाष्ये कैवल्य-पादः+चतुर्थः।